16.2.2021

~~श्री~~ प्रथम खण्डस्य कृते - (साहित्य)

साहित्य दर्पण कर्तुः विश्वनाथस्य परिचयः

प्रायशः संस्कृत साहित्ये ग्रन्थकारस्य परिचयः नास्ति स्पष्टः किन्तु नास्ति साहित्य दर्पण-कारः कविवर विश्वनाथस्य परिचयः तादृशी श्रेण्याम्। अयं हि उत्कल देशीयो ब्राह्मणः आसीत्। अस्य पिता चन्द्रशेखरः साहित्यशास्त्रस्य ज्ञाता चतुर्दशभाषाविद् कलिङ्ग राजस्य सान्धि-विग्रहिक-महापात्र आसीत्। नारायणपाध्यायपितामहो तस्य ज्येष्ठो कवि पण्डित मध्ये मुख्यः। ~~तेन केवलं~~ वैष्णव मतानुयायी आसीत्। तेन अयं हि महाकविः वैष्णवं मतानुयायी आसीत्।

एतत्कारणे विश्वे साहित्य दर्पणस्य चतुर्थ परिच्छेदे अनेन निर्देशः कृतः यत् -

सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।
अल्लावदीननृपतौ न सन्धिर्न च विग्रहः॥

अल्लावदीन खिल्जी प्रसिद्धो यवनराजो दिल्लीश्वर एवासीत्। यस्य 1316 ख्रिष्टाब्दे विष प्रयोगेण मृत्युः अभवत् इति इतिहासकारैः मन्यते। अपि च साहित्य दर्पणस्यैकं हस्तलिखितं पुस्तकम् 1384 ई० वर्षस्योपलब्धम्। उपलब्धं ग्रन्थ एवञ्च ऐतिह्यं साक्ष्यं बाह्याभ्यन्तर पर्यालोचनेन अस्य समयः 1300 तः 1380 पर्यन्तं समीचीनं प्रतीयते।

अयं दृश्य भेदेन सर्वप्रथमः कुकाव्यस्य द्वौ भेदौ ~~स्वीकृत~~ः। अनेन साहित्य-दर्पणे अस्योपरि सम्यक् विचारः कृतः। अस्मिन् एकस्मिन्नेव ग्रन्थे काव्य प्रकाशस्य, दशरूपकस्य, रसगङ्गाधरस्य च संग्रहोऽस्ति। एवञ्च काव्यशास्त्रे अयमेकमेव ग्रन्थो यथा सर्वोकावश्यकतां पूरयेदिति मनसि निधायं मनसि निधायं एव रचितोऽयं ग्रन्थः इति मन्ये।

साहित्य दर्पणातिरिक्ता अनेन विरचिता ग्रन्थाः (1) राघव विलास काव्यम् (2) कुवलयाश्वचरितम् (प्राकृतकाव्यम्) (3) प्रभावती परिणय नाटिका (4) प्रशस्ति रत्नावलिः (5) चन्द्रकला नाटिका (6) नरसिंह विजयं काव्यम् (7) काव्य प्रकाश दर्पण नामकी काव्यप्रकाशस्य टीका चोपलभ्यते

[illegible]

## शास्त्री तृतीय खण्डस्य कृते (साहित्य)

### दोषस्य सामान्य लक्षण भेद सहितञ्च

'रसापकर्षका: दोषा:' इति

श्रुतिदुष्टापुष्टार्थत्वादय: काणत्वखञ्जत्वादय इव शब्दार्थद्वारेण देहद्वारेणेव व्यभिचारिभावादय: इव शब्दवाच्यत्वादयो मूर्खत्वादय इव साक्षात्काव्यस्यात्म-भूतं रसमपकर्षयन्त: काव्यस्यापकर्षका इत्युच्यन्ते' अर्थात् साक्षात्परम्परया रसापकर्षकत्वं दोषत्वमित्यर्थ:।

स च द्विविधो नित्योऽनित्यश्च प्रकारान्तरेणापि समाख्यातुमशक्य: सचेतसां वा नित्यं हेयो दोषो नित्य: यथा च्युतसंस्कारादि:। अनित्य: पुन: क्वचिदुपादेय: यथा-दु:श्रवत्वादि:। तस्य रौद्रादौ उपादेयत्वात्। शृङ्गारादौ च हेयत्वात् दु:श्रवत्वस्य अप्रयुक्तत्वस्य च रौद्रे श्लेषे वा उपादेयत्वात्।

प्रयोजनवशात् तस्य पञ्च प्रकारा: भवन्ति- (1) पददोष:, (2) पदांश दोष:, (3) वाक्यदोष:, (4) अर्थदोष:, (5) रसदोषश्चेति-।

उपेन्द्र सा., 26/4/21

दि० 26/4/21

उपशास्त्री द्वितीय खण्डस्य कृते (साहित्य)

ध्वनेः लक्षण प्रतिपादनम्

ध्वनिपदमिदमनेकार्थ वाचकम्। तद्यथा - ध्वन्यतेऽनेनेति ध्वनिरिति करण व्युत्पत्त्या व्यञ्जनाशक्तेर्वाचकम्। ध्वन्यते इति ध्वनिरिति कर्मव्युत्पत्त्या रसादिव्यङ्ग्यस्य वाचकम्। ध्वन्यतेऽस्मिन्निति ध्वनिरिति अधिकरण व्युत्पत्त्या उत्तमकाव्यमर्थः। ध्वननं ध्वनिरिति भावव्युत्पत्त्या रसादि प्रतीतिरर्थः। वस्तुतस्तु ध्वनति व्यञ्जनया रसादीन् प्रत्याययतीति ध्वनिः शब्दार्थ समुदाय इत्यर्थः।

लक्षणञ्च प्रदत्तम् ग्रन्थकारेण -

वाच्यातिशायिनी व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्।

यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्याधिकं चमत्कारित्वं 'ध्वन्यतेऽस्मिन्निति ध्वनिः' इति व्युत्पत्त्या ध्वनिनामोत्तमं काव्यम्। यथा -

"कदली कदली करभः करभः करिराजकरः करिराजकरः। भुवनत्रितयेऽपि बिभर्ति तुलामिदमूरुयुगं न चमूरुदृशः।"

इत्यत्र द्वितीय कदल्यादि शब्दाः पौनरुक्त्यभिया सामान्यं कदल्यादिरूपे मुख्यार्थे बाधिता जाड्यादिगुणविशिष्ट कदल्यादिरूपमर्थं बोधयति। जाड्यातिशयस्य व्यङ्ग्यः। अत्र वाच्यात् कदल्याद्यर्थविशेषाद् अधिक चमत्कारी जाड्यातिशय रूपोऽर्थः। इति ध्वनिनामोत्तमं काव्यमिदम्।

उपेन्द्र झा